# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय १५

ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः ।
उदयन्हि महाशैलान्मेरोरिव दिवाकरः ।
पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत ॥१॥

स्निग्धवैदूर्यसङ्काशो जाम्बूनदविभूषितः ।
रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः ॥२॥

सागरः समतिक्रम्य पूर्वमामन्त्र्य वीर्यवान् ।
अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥३॥

पृथिवी वायुराकाशमापो ज्योतिश्च राघवः ।
स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥४॥

तत्स्वभावो ममाप्येष यदगाधोऽहमप्लवः ।
विकारस्तु भवेद्राध एतत्ते प्रवदाम्यहम् ॥५॥

न कामान्न च लोभाद्वा न भयात्पार्थिवात्मज ।
ग्राहनक्राकुलजलं स्तम्भयेयं कथं चन ॥६॥

विधास्ये राम येनापि विषहिष्ये ह्यहं तथा ।
ग्राहा न प्रहरिष्यन्ति यावत्सेना तरिष्यति ॥७॥

अयं सौम्य नलो नाम तनुजो विश्वकर्मणः ।
पित्रा दत्तवरः श्रीमान्प्रतिमो विश्वकर्मणः ॥८॥

एष सेतुं महोत्साहः करोतु मयि वानरः ।
तमहं धारयिष्यामि तथा ह्येष यथा पिता ॥९॥

एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्ततः ।
अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलः ॥१०॥

अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये ।
पितुः सामर्थ्यमास्थाय तत्त्वमाह महोदधिः ॥११॥

मम मातुर्वरो दत्तो मन्दरे विश्वकर्मणा ।
औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा ॥१२॥

न चाप्यहमनुक्तो वै प्रब्रूयामात्मनो गुणान् ।
काममद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः ॥१३॥

ततो निसृष्टरामेण सर्वतो हरियूथपाः ।
अभिपेतुर्महारण्यं हृष्टाः शतसहस्रशः ॥१४॥

ते नगान्नगसङ्काशाः शाखामृगगणर्षभाः ।
बभञ्जुर्वानरास्तत्र प्रचकर्षुश्च सागरम् ॥१५॥

ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः ।
कुटजैरर्जुनैस्तालैस्तिकलैस्तिमिशैरपि ॥१६॥

बिल्वकैः सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः ।
चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥१७॥

समूलांश्च विमूलांश्च पादपान्हरिसत्तमाः ।
इन्द्रकेतूनिवोद्यम्य प्रजह्रुर्हरयस्तरून् ॥१८॥

प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धतम् ।
समुत्पतितमाकाशमपासर्पत्ततस्ततः ॥१९॥

दशयोजनविस्तीर्णं शतयोजनमायतम् ।
नलश्चक्रे महासेतुं मध्ये नदनदीपतेः ॥२०॥

शिलानां क्षिप्यमाणानां शैलानां तत्र पात्यताम् ।
बभूव तुमुलः शब्दस्तदा तस्मिन्महोदधौ ॥२१॥

स नलेन कृतः सेतुः सागरे मकरालये ।
शुशुभे सुभगः श्रीमान्स्वातीपथ इवाम्बरे ॥२२॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥२३॥

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
तमचिन्त्यमसह्यं च अद्भुतं लोमहर्षणम् ।
ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् ॥२४॥

तानि कोटिसहस्राणि वानराणां महौजसाम् ।
बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः ॥२५॥

विशालः सुकृतः श्रीमान्सुभूमिः सुसमाहितः ।

अशोभत महासेतुः सीमन्त इव सागरे ॥ २६॥

ततः परे समुद्रस्य गदापाणिर्विभीषणः ।
परेषामभिघतार्थमतिष्ठत्सचिवैः सह ॥ २७॥

अग्रतस्तस्य सैन्यस्य श्रीमान्रामः सलक्ष्मणः ।
जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ॥ २८॥

अन्ये मध्येन गच्छन्ति पार्श्वतोऽन्ये प्लवङ्गमाः ।
सलिले प्रपतन्त्यन्ये मार्गमन्ये न लेभिरे ।
के चिद्विहायस गताः सुपर्णा इव पुप्लुवुः ॥ २९॥

घोषेण महता घोषं सागरस्य समुच्छ्रितम् ।
भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ३०॥

वानराणां हि सा तीर्णा वाहिनी नल सेतुना ।
तीरे निविविशे राज्ञा बहुमूलफलोदके ॥ ३१॥

तदद्भुतं राघव कर्म दुष्करं
समीक्ष्य देवाः सह सिद्धचारणैः ।
उपेत्य रामं सहिता महर्षिभिः
समभ्यषिञ्चन्सुशुभैर्जलैः पृथक् ॥ ३२॥

जयस्व शत्रून्नरदेव मेदिनीं
ससागरां पालय शाश्वतीः समाः ।
इतीव रामं नरदेवसत्कृतं
शुभैर्वचोभिर्विविधैरपूजयन् ॥ ३३॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com